त्रपु, क्ली, (त्रपते अग्निसम्पर्केण लज्जते इव । त्रप + “शॄस्वृस्निहित्रपीति ।” उणां । १ । ११ । इति उः ।) सीसकम् । रङ्गम् । इति मेदिनी । पे, ६ ॥ (यथा, पञ्चतन्त्रे । १ । ८५ ।
“कनकभूषणसंग्रहणोचितो
यदि मणिस्त्रपुणि प्रतिबध्यते ।
न स विरौति न चाप्युपशोभते
भवति योजयितुर्वचनीयता ॥”)

त्रपुः, [स्] क्ली, (त्रपते वह्निं प्राप्य लज्जते इव । त्रप + “उस् खात्तपादेः स तु कित् ।” २।४६०। इति उणादिकोषटीकाधृतसूत्रात् उस् ।) रङ्गम् । इत्युणादिकोषः ॥ (यथा, ग्रहभावप्रकाशे ।
“भौमे त्रपुः शनौ लौहं राहावश्मानि कीर्त्तयेत् ॥”
रङ्गशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

त्रपुकर्कटी, स्त्री, (त्रपुवत् शुभ्रा कर्कटी ।) त्रपुषी । इति राजनिर्घण्टः ॥

त्रपुटी, स्त्री, सूक्ष्मैला । इति रत्नमाला ॥

त्रपुलं, क्ली, (त्रपते वह्निसंसर्गेण लज्जते इव । त्रप + बाहुलकात् उलच् ।) रङ्गम् । इति भरतधृतद्विरूपकोषः ॥

त्रपुषं, क्ली, (त्रप + बाहुलकात् उषः ।) रङ्गम् । इति भरतधृतद्विरूपकोषः ॥ त्रपुषीफलम् । शसा इति भाषा । तत्पर्य्यायः । कण्टकिफलम् २ सुधावासम् ३ सुशीतलम् ४ । तल्लघुफलगुणाः । नीलत्वम् । बलतृड्भ्रमदाहपित्तरक्तपित्तनाशित्वम् । स्वादुत्वम् । शीतलत्वञ्च । तत्पक्वफलगुणाः । अम्लत्वम् । उष्णत्वम् । पित्तलत्वम् । कफवातनाशित्वञ्च । तद्बृहत्फलगुणाः । मूत्रलत्वम् । शीतलत्वम् । रूक्षत्वम् । पित्ताश्मकृच्छ्रनाशित्वञ्च । इति भावप्रकाशः ॥ अस्य सामान्यगुणाः । स्वादुत्वम् । गुरुत्वम् । विष्टम्भित्वम् । शीतलत्वम् । सुखप्रियत्वम् । रूक्षत्वम् । अतिमूत्रलत्वञ्च । इति राजवल्लभः ॥

त्रपुषी, स्त्री, (त्रपुष + गौरादित्वात् ङीष् ।) कर्कटी । इति हेमचन्द्रः । ४ । २५५ ॥ (यथा,
“पटोलकैर्व्वारुत्रपुष्यलावूः ॥”
इति हारीते प्रथमेस्थाने दशमेऽध्याये ॥)
दन्त्यसान्तोऽपि पाठः ॥

त्रपुसं, क्ली, (त्रपते वह्नियोगेन लज्जते इव । त्रप + बाहुलकात् उसः ।) रङ्गम् । इति राजनिर्घण्टः ॥ कर्कटी । अस्य गुणा यथा,—
“बालं सुनीलं त्रपुसं तेषां पित्तहरं स्मृतम् ।
तत् पाण्डुकफकृज्जीर्णमम्लं वातकफापहम् ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

त्रपुसी, स्त्री, (त्रपुस + गौरादित्वात् ङीष् ।) महेन्द्रवारुणी । कर्कटी । लताविशेषः । शसा इति क्षीरा इति च भाषा । तत्पर्य्यायः । पीतपुष्पा २ काखालुः ३ त्रपुकर्कटी ४ बहुफला ५ कोषफला ६ तुन्दिलफला ७ कण्टकौलता ८ सुधावासा ९ । अस्याः फलस्य गुणाः । रुच्यत्वम् । मधुरत्वम् । शिशिरत्वम् । गुरुत्वम् । भ्रमपित्तविदाहार्त्तिवान्तिनाशित्वम् । बहुमूत्रदत्वञ्च । काखालुरित्यत्र कण्टालुरपि पाठः । इति राजनिर्घण्टः ॥ (अस्या व्यवहारो यथा, सुश्रुते उत्तरतन्त्रे ४५ अध्याये ।
“त्रपुसीमूलकल्कं वा सक्षौद्रं तण्डुलाम्बुना ।
पिबेदक्षसमं कल्कं यष्टीमधुकमेव वा ॥”)

त्रप्सं, क्ली, (द्रप्सं निपातनात् दस्य तः ।) द्रप्सम् । घनेतरदधि । इत्यमरटीकायां भरतधृतविद्याविनोदः ॥ पातला दइ इति भाषा ॥

त्रयं, क्ली, (त्रयोऽवयवा यस्य । त्रि + “संख्याया अवयवे तयप् ।” ५ । २ । ४२ । इति तयप् । “द्वित्रिभ्यां तयस्यायज्वा ।” ५ । २ । ४३ । इति तयस्यायच् ।) त्र्यवयवम् । इति मुग्धबोधम् ॥ तिन इति भाषा ॥ (यथा, मनुः । २ । ७६ ।
“अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः ।
वेदत्रयात् निरदुहत् भूर्भुवःस्वरितीति च ॥”)

त्रयः, पुं, (तरतीति । तॄ + “तरतेर्ड्रिः ।” उणां ५ । ६६ । इति ड्रिः ।) त्रिसंख्या । तिन इति भाषा । त्रिशब्दस्य बहुवचनान्तरूपोऽयम् । अस्य स्त्रीलिङ्गक्लीवलिङ्गयो रूपे तिस्रः त्रीणि । इति व्याकरणम् ॥ तद्वाचकानि यथा,—
कालः १ अग्निः २ भुवनम् ३ गङ्गामार्गः ४ शिवचक्षुः ५ गुणः ६ ग्रीवारेखा ७ कालिदासकाव्यम् ८ वलिः ९ सन्ध्या १० पुरम् ११ पुष्करम् १२ रामः १३ विष्णुः १४ ज्वरपादः १५ । इति कविकल्पलता ॥ त्रिसंख्याविशिष्टे, त्रि । इत्यमरः ॥
“तिस्रो भार्य्या विप्रजाश्च त्रयो भृत्याश्च बान्धवाः ।
ध्रुवं वेदविरुद्धाश्च न ह्येते मङ्गलप्रदाः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

त्रयी, स्त्री, (त्रय + “टिड्ढेति ।” ४ । १ । १५ । इति ङीप् ।) ऋक्सामयजुर्वेदाः एतत्त्रितयम् । इत्यमरः । १ । ६ । ३ ॥ (यथा, मनुः ।७।४३।
“त्रैविद्येभ्यस्त्रयीं विद्यात् दण्डनीतिञ्च शाश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः ॥”)
पुरन्ध्री । सुमतिः । इति विश्वः ॥ सोमराजीवृक्षः । इति शब्दचन्द्रिका ॥ दुर्गा । यथा,—
“ऋग्यजुःसामभागेन साङ्गवेदगतापि वा ।
त्रयीति पठ्यते लोके इष्टादृष्टार्थसाधिनी ॥”
इति देवीपुराणे ४५ अध्यायः ॥

त्रयीतनुः, पुं, (त्रयी वेदा एव तनुः शरीरं यस्य । “त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्य्यमात्मानं यजन्ते ।” इति भागवतवाक्यात् । ५ । २० । ४ । अस्य तथात्वम् ।) सूर्य्यः । इति हलायुधः ॥

त्रयीधर्म्मः, पुं, (त्रय्या वेदत्रयेण विहितो धर्म्मः ।) ऋग्यजुःसाम्नां विधानम् । त्रिवेदोक्तकर्म्म । इत्यमरः । १ । ६ । ३ ॥ (यथा, महाभारते । ३ । १५० । ३२ ।
“सा चेद्धर्म्मकृता न स्यात्त्रयीधर्म्मन्दते भुवि ॥”)

त्रयीमुखः, पुं, (त्रयी वेदा मुखे यस्य ।) ब्राह्मणः । इति हेमचन्द्रः । ३ । ४ । ७५ ॥

त्रयोदश, [न्] त्रि, (त्र्यधिका दश इति कर्म्मधारयः । “त्रेस्त्रयः ।” ६ । ३ । ४८ । इति त्रयस् ।) संख्याविशेषः । १३ तेर इति भाषा । बहुवचनान्तोऽयम् । (यथा, मनुः । ९ । १२९ ।
“ददौ स दश धर्म्माय कश्यपाय त्रयोदश ॥”)
तत्संख्यायुक्तश्च । इत्यमरः ॥ तद्वाचकः । ताम्बूलगुणः १ । इति कविकल्पलता ॥

त्रयोदशः, त्रि, (त्रयोदशानां पूरणः । “तस्य पूरणे डट् ।” ५ । २ । ४८ । इति डट् ।) त्रयोदशानां पूरणः । इति व्याकरणम् ॥ तेरइ इत्यादि भाषा । (यथा, रामायणे ।२।७७।२२।
“त्रयोदशोऽयं दिवसः पितुर्वृत्तस्य ते विभो ! ।
सावशेषास्थिनिचये किमिह त्वं विलम्बसे ॥”)

त्रयोदशी, स्त्री, (त्रयोदश + टित्वात् ङीप् ।) तिथिविशेषः । सा चन्द्रस्य त्रयोदशकलाक्रियारूपा त्रयोदशकलाक्रियावच्छिन्नकालरूपा वा । इति तिथ्यादितत्त्वम् ॥ तत्र जातस्य फलं यथा,
“रूपान्वितः सात्त्विकभावहीनः
सुखी च बाल्ये जननीप्रियश्च ।
सदालसः शिल्पगुणैकवेत्ता
त्रयोदशी जन्मतिथिर्यदि स्यात् ॥”
इति कोष्ठीप्रदीपः ॥
इयं धर्म्मस्य तिथिः । इति वराहपुराणम् ॥

त्रस, क धृतौ । ग्रहे । निषेधे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) एतदाद्याश्चत्वारो रेफयुक्तादाः । क, त्रासयति स्वर्णं व्याधः वधति गृह्णाति निराकरोति वा इत्यर्थः । इति दुर्गादासः ॥

त्रस, इ कि भासि । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-अकं-सेट् ।) इ, त्रंस्यते । कि, त्रंसयति त्रंसति । भासि दीप्तौ । इति दुर्गादासः ॥

त्रस, ई श भये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् । ईदित्वात् क्तनिङ्निष्ठः ।) ई, त्रस्तः । श, त्रेसतुः तत्रसतुः । त्रसति । इति दुर्गादासः ॥

त्रस, य ई भये । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् । ईदित्वादनिड्निष्ठः ।) य, त्रस्यति । ई, त्रस्तः । इति दुर्गादासः ॥

त्रसं, क्ली, (त्रस्यति बिभेत्यस्मिन् इति । त्रस-भये + घञर्थे कः ।) वनम् । इति त्रिकाण्डशेषः ॥

त्रसः, त्रि, (त्रसतीति । त्रस भये + पचाद्यच् ।) जङ्गमः । इत्यमरः । ३ । १ । ७४ ॥ (यथा, महाभारते । १२ । ९ । १९ ।
“ऋजुः प्रणिहितो गच्छंस्त्रसस्थावरवर्ज्जकः ॥”)

त्रसरः, पुं, (त्रस्यन्ति धातूनामनेकार्थत्वात् सञ्चाल्य वेष्टयन्त्यनेनेति । त्रस + बाहुलकात् अरन् ।) तन्तुवायोपकरणविशेषः । तासनी इति भाषा । तत्पर्य्यायः । सूत्रवेष्टनम् २ । इत्यमरः ।३।२।२४। तसरः ३ । इति भरतः ॥